# वराहोक्तवर्षाविज्ञानविमर्शः

**रविशर्माबास्तोला**

Department of Astrology & Astronomy
Shree Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

*Submitted : 27 Nov.2025*
*Reviewed : 23 Dec. 2025*
*Accepted: 29 Dec. 2025*
***DOI:** 10.3126/kdk.v6i1.90129*

***Corresponding Author:***
*Ravi Sharma Bastola*
***Email:** ravi.bastola@nsu.edu.np*
**ORCID:** *https://orcid.org/0009-0009-4324-9109*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal
**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about
**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

***सारः*** *प्रस्तुतोऽयं लेख आचार्यवराहोक्तस्य वर्षाविज्ञानस्य वर्णने केन्द्रितोऽस्ति । ग्रह-नक्षत्र-ताराणां गतीनां योगानां तथा च पर्यावरणस्य अनुसन्धानेन कृतं वर्षाया अनुमानं वर्षाविज्ञानम् । यद्यपि आधुनिकैः वातावरणविद्भिः वायोः मेघस्य च परिस्थितिं परीक्ष्य वर्षायाः पूर्वानुमानं विधीयते तथापि प्राचीनकाले ज्योतिर्विद्भिः कया रीत्या वर्षाया अनुमानं विधीयते स्म इति विषये अद्यतना वातावरणविद नावगच्छन्ति । अयं लेखः प्राचीनकाले वर्षायां पूर्वानुमानं कया पद्धत्या क्रियते स्म इति विषयं प्रकाशयति । वर्षाविज्ञानविषये ज्यौतिषशास्त्रविद्भिः बहुभिराचार्यैः वृहती चर्चा न कृता, तस्मात् प्रमुखरूपेण वराहस्य बृहत् संहिताया आश्रयं गृहीत्वा विहितमिदं वर्षाविज्ञानविषयकं गुणात्मकमनुसन्धानम् । अस्यानुसन्धानेन ज्योतिर्विद्भिः अनुसन्धितवर्षाविज्ञानस्य महत्त्वं प्रतिपाद्य आधुनिकसमयेऽपि तस्य विज्ञानस्य ज्ञानेन प्रयोगेण च वर्षायाः पूर्वानुमानं कर्तुं शक्यते इति प्रकाश्यते । वर्षाज्ञानाय ज्योतिर्विद्भिः प्रयुक्तो अनुमानविधि आधुनिकैरपि अनुसर्तव्य इत्यस्य लेखस्य अभिप्रायो विद्यते ।*

**शब्दकुञ्जिका :** गर्भप्रसवः, गर्भलक्षणानि , मेघगर्भः, वर्षा ,वर्षाविज्ञानं, संहिता शास्त्रम्

**विषयपरिचयः**

वर्षाधारभूतमन्नम् अन्नाधारभूतं च जीवनम् । अस्य परस्परमन्योन्याश्रयसम्बन्धस्य प्राथमिकी आधारभूता वर्षा अस्ति । यदि वर्षा न भवति तदा अन्नमपि नभवति जीवनमपि न पुष्पायते । वर्षा जीवनधारणस्य प्रमुखसहायिका । तथा च वर्षायाः कारणेनैव जीवने सङ्कटस्यावस्था अपि आगच्छति । अतिवर्षणादीनामुत्पातानां कारणेन जनजीवने समागतायाः प्रतिकूलावस्थायाः साक्षिणः वयमेव । तस्माद् वर्षा जीवनसहायिका नाशिकाऽपि च भवितुं शक्नोति । यथोक्तं पराशरेण -

वृष्टिमूला कृषिः सर्वा वृष्टि मूलञ्च जीवनम्
तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् ॥ (कृषिपराशरः, वृष्टिखण्डः , श्लो. १)

तथा च श्रीमद्भगवद्गीतायां वर्षाया: महत्वं यथा वर्णितम् -

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ (श्रीमद्भगवद्गीता, ३/१४)

पृथिव्यां स्थितानां जीवानां वनस्पतीनां च कृते वर्षा अपरिहार्या विद्यते इति सर्वैरनुभूयते। वर्षां विना न केऽपि प्राणिनो जीवन्ति । व्यक्तेर्राष्ट्रस्यापि कृते वर्षा अतीव महत्त्वपूर्णा विद्यते । अतएव कस्मिन् योगे कीदृशी वर्षा भविष्यतीति विचार आवश्यकोस्ति। वर्षाविज्ञानसम्बद्धज्ञानं न सामान्यम् अपि तु विशेषम् शास्त्रज्ञानरहितानां कृते नावगम्यम्।

**अध्ययनविधि:**

प्रमुखरूपेण आगमन विधिना विहितमिदमध्ययनम् । अत्र वर्षाविज्ञानसूचका ज्यौतिषशास्त्रपरका: संहिताग्रन्था प्रमुखा: सन्ति । विशेषरूपेणास्मिन् अनुसन्धानकर्मणि वराहस्य बृहत् संहिताया: प्रयोगो विहित: तथैव तस्यैव ग्रन्थस्य भट्टोत्पलीयाविवृति:, तत्रस्थानां गर्गपराशरादीनां मतानामाश्रयो गृहीत: ।

**अध्ययनस्य क्षेत्रं सीमा च**

वराहो बृहत् संहितायां बहुषु पर्यावरणसम्बद्धविषयेषु स्वचिन्तनं प्रस्तौति परन्त्वत्र तत्रोक्तस्य वर्षा विज्ञानसम्मतस्य सिद्धान्तस्य प्रदर्शनमेवास्यानुसन्धानात्मकलेखस्य क्षेत्रं सीमा च वर्तते।

**वर्षाविज्ञानपरिचय:**

वर्ष - वर्षणमस्ति आसु इति वर्षा अर्शादित्वात् अच् स्त्रीत्त्वविवक्षायां कृतेन टाप् प्रत्ययेन वर्षा शब्दो निष्पद्यते। प्रायशः जलवर्षणमेव वर्षा इति नाम्ना व्यवह्रियते परन्तु वर्षा तुषारहिमकरादीनां भेदात् बहुधा भवति । सूर्यकिरणानां तापेन सन्तप्तं जलं जलवाष्परूपेण विपरिणमते। एतदेव जलवाष्पमुच्चाकाशं प्रति वायुना नीयते, तत्रोच्चाकाशे तापक्रमस्य न्यूनत्त्वात् तज्जलवाष्पं पुनरम्बुकणेषु विपरिणमते। शीतसम्पर्कात् वायुर्घनीभूय यदा सङ्कोचमेति तदा तु अम्बुकणाः परस्परं नैकट्यं प्राप्नुवन्ति। परस्परं मिलित्वा लघुजलकणा अपि स्थूला भवन्ति तदा मेघरूपात्मकेन वायुना धारितुमसमर्था जलकणा भूमौ निपतन्ति, इयमेव वर्षाप्रक्रिया अस्ति । सूर्यकिरणसन्तप्तजलकणा वाष्पीभूय यावत् कालपर्यन्तं मेघे विपरिणमन्ते असौ कालो मेघगर्भोऽस्ति। इयं वर्षाप्रक्रिया ईश्वरेण सञ्चालिता इति प्राचीनमतम्। तथा हि -

सूर्यग्रस्तश्च नीरञ्च काले तस्मात् समुद्भवः
सूर्यो मेघादयः सर्वे विधात्रा ते निरूपिताः॥

हस्ती समुद्रायकरेण जलमीप्सितम्
दद्यात् घनाय तद् दद्यात् वातेन प्रेरितो नभः ॥
स्थाने स्थाने पृथिव्यां च काले काले यथोचितम्
ईशेच्छयाऽविर्भूतं च तत् भवेत् प्रतिबन्धकम् ॥ (ब्रह्मवैवर्तमहापुराणे श्रीकृष्णजन्मखण्डे २१/१०५-७)

वर्षायाःवैज्ञानिककारणाभिज्ञाः मुनयस्तु वर्षायावैज्ञानिककारणं मनुस्मृते: टीकायां यथा कथयन्ति –

अग्नौ प्राप्ताहुतिः सम्यग् आदित्यमुपतिष्ठते
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा: ॥ (मनुस्मृति:,३/७६)

मनुभाष्ये वर्षायाः स्रोतरूपेणादित्यस्य स्तुतिः कृता अस्ति । आधुनिकविज्ञानेनापि श्रीसूर्य एव वृष्टेः कारणं स्वीकृतम् । तथा च छान्दोग्योपनिषदः शाङ्करभाष्ये अपि वर्षाया वैज्ञानिककारणं सम्यग् वर्णितम् –"तेजो वावाद्भयो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निरशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथाप: सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रदाश्चरन्ति तस्मादाहुर्विद्योतते, स्तनयति वर्षिष्यति इति वा" (छान्दोग्योपनिषद्, ११/ १) । छान्दोग्योपनिषदि वर्षाया: कारणं सूर्य: वायुश्च विद्येते इति स्पष्टरूपेण प्रतिपादितम् । ग्रीष्मर्तौ मेघलक्षणानि, पर्यावरणलक्षणानि, नक्षत्रलक्षणानि, शकुनलक्षणानि च विचार्य जायमानया वर्षाया अनुमानमेव वर्षाविज्ञानम् । वर्षाविज्ञाने मेघानाम्, वातावरणस्य च निरीक्षणेन भाविन्या वर्षाया अनुमानं विधियते । वर्षाविज्ञाने वर्षाकारकतत्त्वानां मेघ-मरुत्-हिम-तुषारादीनां लक्षणानि विचार्यन्ते , ततस्तेषां लक्षणानामाधारेण वर्षायाः पूर्वानुमानं क्रियते । एतत् पूर्वानुमानं कृषकाणां वणिग्जनानां सर्वकारस्य च कृते अतीवोपयोगि भवितुं शक्नोति । नानाविधविकासकर्मणां सम्पादनाय अपि एतद्विज्ञानम् सहयोगि भवेदिति अत्र नास्ति शंकालेष: ।

एतत् वर्षाविज्ञानसम्बद्धमनुसन्धानमार्ष विज्ञानम् विद्यते । आचार्यवराहतः पूर्वं गर्गपराशरकाश्यपा विज्ञानस्यास्य अनुसन्धातारो आसन्, तेभ्यः पूर्वमाचार्यबृहस्पतिः विज्ञानस्यास्य प्रयोगमकरोत् इत्याचार्यवराहस्यैव वचनमस्ति । यथोक्तं बृहत् संहितायां -

तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानि दृषट्वेदम्
क्रियते गर्गपराशरकाश्यपवज्रादिरचितानि ॥ (बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. २)

आचार्यवराहमिहिरेणैतेषापूर्वोक्तानामाचार्याणां मतानामनुसन्धानं कृत्वैव बृहत्संहितायां स्पष्टरूपेण प्रतपादितम् । बृहत्संहितायामुल्लिखितान्याचार्यवराहमिहिरस्य वचनानि साम्प्रतिकेऽस्मिन् समयेऽपि वर्षाविज्ञानस्य मानकवचनानि सन्ति ।

वैदिककाले विज्ञानस्यास्य विषये बहून् ग्रन्थान् अरचयन् । तथा च आधुनिककाले आधुनिकविद्वद्भिः विज्ञानस्यानुसन्धानं विहितम् । आचार्यनारदस्य नारदसंहितायां वर्षाप्रश्ने एतदुक्तं -

वर्षाप्रश्ने वारिभेब्जे पूर्णे वै लग्नेगेऽपि वा

केन्द्रगे वा शुक्लपक्षे चातिवृष्टिः शुभेक्षिते ॥ (नारदसंहिता, ३/५१)

तस्मिन्नध्याये वर्षाप्रश्ने अन्येषामपि प्रश्नानां समाधानं विहितम् इति तत्र द्रष्टुं शक्यते। तथैव आचार्यगर्गस्य गर्गसंहिता एवमेव बहूनामाचार्याणां वर्षाविज्ञानपरका ग्रन्था आसन्। यथा ब्रह्ममवैर्वत पुराणे वर्षाविज्ञानस्य विषये समुपलब्धवचनम् –

सूर्यग्रस्तश्च नीरञ्च काले तस्मात् समुद्भवः
सूर्यो मेघादयः सर्वे विधात्रा ते निरूपिताः ॥
यत्राब्दे यो जलधरो गजश्च सागरो मतः
सस्याधिपो नृपो मन्त्री विधात्रा ते निरूपिताः ॥ (ब्रह्मवैवर्तमहापुराणे श्रीकृष्णजन्मखण्डे २१/१०५-७)

विज्ञानमेतत् प्राचीनसंस्कृतग्रन्थेषु वृष्टिविज्ञानमिति नाम्नापि प्रथितमासीत्। अस्या विद्याया: प्रयोगविषये अयं श्लोकः दर्शनीयः –

दैवविदविहतचित्तो द्युनिशं यो गर्भलक्षणे भवति
तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ॥ (बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ३)

आवैदिककालाद् वर्षाविज्ञानस्य चिन्तनमारब्धम्, तथा च अद्यपर्यन्तमपि विद्वांस वर्षाविज्ञानस्य अनुसन्धानं कुर्वन्तः सन्ति। ऋग्वेदस्याष्टममण्डले वृष्टेः, वृष्टिकारणभूतानां मेघमरुतादीनां च वैज्ञानिकवर्णनं प्राप्यते। नारद–कश्यप–गर्ग–वशिष्ठ–पराशर–द्रुहिण–देवल–वज्रप्रभृतिभिः स्मृतिकारैर्विज्ञानमेनमधिकृत्य ग्रन्थरचना विहिता। सम्प्रति प्राचीनग्रन्थानां प्राप्तिर्दुर्लभा परन्तु बृहत्संहितायाः टीकाकारस्य भट्टोत्पलस्य भट्टोत्पलीयटीकायामुद्धृतानि पूर्वाचार्याणां वचनानि द्रष्टुं शक्यन्ते।

गर्गवचनम्-

शुक्लादौ मार्गशीर्षस्य पूर्वाषाढाव्यवस्थिते
निशाकरे तु गर्भाणां तत्रादौ लक्षण वदेत्॥ (बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ६)

पराशरवचनम्-

अथ माघेन श्रावणं फाल्गुनेन भाद्रपदं चैत्रेणाश्वयुजं वैशाखेन तु कर्तिकं शुक्लेन कृषणं कृष्णेन शुक्लं दिवसेन रात्रिं रात्र्या दिवसं गर्भाः प्रवर्षन्ति। (बृहत्संहिता, गर्भलक्षणाध्याय:, श्लो. १३)

काश्यपवचनम् -

शीतमभ्रं तथा वायुश्चन्द्रार्कपरिवेषणम्
माघे मासि परीक्षेत श्रावणे वृष्टिमादिशेत्
फाल्गुने चात्र सङ्घातं वृष्टिस्तनितमेव च
पुरोवाताश्च ये प्रोक्ता मासि भाद्रपदे शुभम्

बहुपुष्पफला वृक्षा वाताः शर्कवर्षिणः
शीतवर्षा तथाभ्राणि चैत्रेणाश्वयुजं वदेत् ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. १९-२२)

बहुषु ग्रन्थेष्वांशिकरूपेण वर्षाविज्ञानस्य चर्चा विद्यते। वराहस्य बृहत् संहितायां वर्षाविज्ञानस्य विषये विशदं वर्णनं प्राप्यते । आचार्येणानेन वर्षाविज्ञानस्य विषये गर्भधारणलक्षणाध्यायत आरभ्य गर्भधारणाध्याय–प्रवर्षणाध्याय–रोहिणीयोगाध्याय–स्वातीयोगाध्याय–वातचक्राध्याय–सद्योवर्षणाध्यायपर्यन्तं वर्षाविज्ञानस्य सम्यग् व्याख्यानं कृतमस्ति । वराहः स्वग्रन्थे वर्षाविज्ञानस्य महत्त्वं वर्णयति। तद्यथा -

अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम्
यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. १)

**वराहोक्तवर्षाविज्ञानस्य प्रयोगविधयः**

वर्षाया भविष्यवाणी अति दुष्करास्ति। कठिनानुसन्धानेन वैज्ञानिकविधीनां समुचितप्रयोगेण च वर्षाया अनुमानं कर्तुं शक्यते। वर्षाविज्ञानस्य प्रयोगविधिं वराहः ईत्थं प्रतिपादयति -

***गर्भलक्षणाध्ययनम्***

यदा सूर्येण सन्तप्तो वायुः पर्याप्तं जलवाष्पमादाय उच्चाकाशे गच्छति तदा तदा जलवाष्पस्य घनीभूतरूपान्तरणेन मेघा भवन्ति। यद्यपि यस्मिन् कस्मिन्नपि काले समुचिततापक्रमे मेघगर्भधारणं भवति । यथोक्तं वराहेण -

मार्गशिरःसितपक्षप्रतिपत्प्रभृत क्षपाकरेऽषाढाम्
पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. ६)

तेषां मेघानां गर्भप्रसवरूपेण वर्षा भवति । अत्र पूर्वमेव वर्षाप्रक्रियाया चिन्तनं विहितं तदेव वृष्टिगर्भधारणस्य प्रथमचरणम्। गर्भपरीक्षणकालनिर्णये आचार्याणां मतवैविध्यमस्ति। केचन कार्तिकशुक्लपक्षानन्तरं गर्भकालोऽस्तीति वदन्ति। अयं विचारो वह्वाचार्याः न स्वीकुर्वन्ति । वराहोऽपि गर्गमतमेव स्वीकृत्य अन्येषां स्वग्रन्थे प्रदर्शयति । भट्टोत्पलटीकायां पूर्वाचार्याणां मतानि प्रदर्शितानि सन्ति। तानि -
आचार्यगर्गमतं तु -

शुक्लादौ मार्गशीर्षस्य पूर्वाषाढाव्यवस्थिते
निशाकरे तु गर्भाणां तत्रादौ लक्षणं वदेत् ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. ६)

आचार्यगर्गमते मार्गशीर्षमासस्य शुक्लपक्षे यदा चन्द्रः पूर्वाषाढा नक्षत्रे भवति तदा एव गर्भलक्षणस्य विचारो कर्तव्यः।

आचार्यसिद्धसेनमते -

शुक्लपक्षमतिक्रम्य कार्तिकस्य विचारयेत्
गर्भाणां सम्भवं सम्यक् सस्यसम्पत्तिकारणम् ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. ५)

आचार्यसिद्धसेनमते तु कार्तिकशुक्लपक्षं पश्चादेव गर्भलक्षणस्य विचारः उचितः । गर्भलक्षणविचारे आचार्यकाश्यपोऽपि गर्गाचार्यस्य वचनानि स्वीकरोति।

आचार्यकाश्यपस्य वचनन्तु -

सितादौ मार्गशीर्षस्य प्रतिपद् दिवसे तथा
पूर्वाषाढागते चन्द्रे गर्भाणां धारणं भवेत् ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. ६)

आचार्यवराहस्य मतेन मार्गशीर्षमासस्य शुक्लपक्षे यदा चन्द्रः पूर्वाषाढानक्षत्रं प्रति गच्छति तदा एव गर्भलक्षणविचारप्रक्रिया कर्तव्या न च कार्तिके।

***गर्भप्रसवनिर्णयः***

धृतगर्भोऽवश्यमेव प्रसवाय भवति। यदि प्रसवो न भवति तदा किं वा गर्भनाशोऽभूत् इति शङ्क्यम्। प्रायः यस्मिन् नक्षत्रस्थे चन्द्रे वृष्टिगर्भो धार्यते, पञ्चनवते दिनशते सौरदिवसे व्यतीते पुनस्तन्नक्षत्रस्थे चन्द्रे मेघगर्भप्रसवो भवति । आचार्यवराहमते तु -

यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात्
पञ्चनवते दिनशते तत्रैव प्रसवमायाति ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. ७)

मार्गशीर्षशुक्लपक्षस्य यस्मिन् दिने चन्द्रः पूर्वाषाढानक्षत्रं प्रति गच्छति तस्मिन् दिने आकाशस्य निरीक्षणं कर्तव्यम्। अवश्यमेवाकाशे तस्मिन् दिवसे रात्रौ वा मेघाः भवष्यिन्ति। तत आरभ्य येषु येषु दिवसेषु रात्रौ वा मेघाः दृश्यन्ते तस्मिन् समये किं नक्षत्रमस्तीति विचारो कर्तव्यः । इत्थं परीक्षणं मार्गशीर्षमासस्य शुक्लपक्षत आरभ्य चैत्रशुक्लपर्यन्तं कर्तव्यम् । अनेन निरीक्षणेन वषर्तौ कदा वर्षा भवतीति ज्ञानं भवति। एवञ्च आषाढश्रावणभाद्रपदाश्विनकार्तिकेष्वपि भाविन्या वृष्टे ज्ञानं भवति। यस्मिन् दिने पूर्वोक्तेन विधिना गर्भपरीक्षणं क्रियते तस्मिन् दिवसे चन्द्रः यस्मिन् नक्षत्रे वर्तते ततः १९५ सावनदिवसानन्तरं यदा चन्द्रः तस्मिन्नेव नक्षत्रे भ्रमणवशादायाति तदा वर्षा भवति।

***गर्भसमये शुभाशुभलक्षणविचारः***

मार्गशीर्षमासशुक्लपक्षतश्चैत्रमासपर्यन्तं गर्भनिरीक्षणस्य समयोऽस्ति । मासेष्वेषु दृष्टानां लक्षणानामध्ययनेन गर्भधारणस्य सम्भावनाया ज्ञानं क्रियते। प्रथमं तावत् शुभलक्षणानि विचारणीयानि भवन्ति। यदि गर्भधारणकाले पूर्वोत्तरदिग्भ्यां

वायोः प्रसरणमनुभूयते तदा गर्भो धृत इति ज्ञातव्यम् । गर्भधारणकाले उत्पातरहितो स्वच्छाकाशः सफलगर्भधारणं सूचयति । सूर्यचन्द्रमसोः स्निग्धपरिवेशानां दर्शनमपि शुभदं भवति । तथैव क्षुरिकाकाराः, लोहिताभायुक्ताः, काकाण्डवदाभायुक्ताः मेघाः गर्भधारणकाले शुभफलदातारो भवन्ति । सन्ध्यासु इन्द्रधनुषः तथा च रात्रौ स्वच्छाभायुक्तानां नक्षत्रचन्द्रतारकाणां दर्शनेन गर्भधारणक्रियायाः साफल्यत्वमपेक्षणीयं भवति । गर्भधारणकाले एतादृशलक्षणानां दर्शनं सफलगर्भधारणं सूचयति । आचार्यवराहानुसारेण -

ह्लादिमृदूदक्शिवशक्रदिग्भवो मारुतो वियद्विमलम्
स्निग्धघनबहुलपरिवेषपरिवृत्तौ हिममयूखार्कौ
पृथुबहुलस्निग्धघनं घनसूचीक्षुरकलोहिताभ्रयुतम्
काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम्
सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यका शुभा सन्ध्या
शशिशिवशक्राशास्थाः शान्तरवाः पक्षिमृगसङ्घाः
विपुलाः प्रदक्षिणचराः स्निग्धमयूखाः ग्रहाः निरुपसर्गाः
तरवश्चनिरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः
गर्भाणां पुष्टिकराः सर्वेषामेव योऽत्र तु विशेषः
स्वर्तुस्वभावजनितो गर्भविवृद्धयै तमभिधास्ये ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. १४-१८)

गर्भधारणकाले अतीव शुभलक्षणानां दर्शनेन वर्षाकाले अधिकवर्षायाः सम्भाव्यता भवति । गर्भकाले यदि मेघा मुक्तारत्नवदाभायुक्ता एवञ्च, रजतवत् शुक्ला अथवा च नीलोत्पलेवाभायुक्ता दृश्यन्ते तदा वर्षाकाले अधिकवर्षा भवति । गर्भधारणकाले जलचरजीवकारेवाकारयुक्ताः मेघा अपि बहुतोयदाः भवन्ति । आचार्यवराहेण तानि लक्षणानि यथोक्तानि -

मुक्तारजतनिकाशास्तामालनीलोत्पलाञ्जनाभासः
जलचरसत्वाकाराः गर्भेषु घना प्रभूतजलाः ॥
तीव्रदिवाकरकिरणाभितापिता मन्दमारुता जलदाः
रुषिता इव धाराभिर्विसृज्यन्त्यम्भः प्रसवकाले ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. २३-२४)

***प्रतिमासं गर्भलक्षणविचारः***

मार्गशीर्षमासस्य शुक्लपक्षे पूर्वाषाढानक्षत्रे चन्द्रप्रवेशत आरभ्य वैशाखमासपर्यन्तं गर्भनिरीक्षणं कर्तव्यम् । मासे–मासे द्रष्टव्यं मेघगर्भलक्षणं आचार्यवराहमतानुसारेण यथास्ति -

पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदा सपरिवेषाः
नात्यर्थं मृगशीर्षे शीतं पौषेऽतिहिमपातः

माघेप्रबलो वायुस्तुषारकलुषद्युति रविशशाङ्कौ
अतिशीतं सघनस्य च भानोरस्तोदयौ धन्यौ
फाल्गुनमासे रुक्षश्चण्डः पवनोऽभ्रसम्प्लवाः स्निग्धाः
परिवेषशाचासकला कपिलस्ताम्रो रविश्च शुभः
पवन्घनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः
घनपवनसलिलविद्युत्स्तनितैश्च हिताय वैशाखे ॥ (बृहत् संहिता, गर्भलक्षणाध्यायः, श्लो. १९-२२)

**मार्गशीर्षपौषयोः लक्षणविवरणम् .** एषु मासेसु सूर्यास्तसमये यदि रक्ताभायुक्तो सन्ध्याकाशो दृश्यते तदा गर्भधारणमभूदिति कल्पनीयम् । मासेष्वेषु सपिरेवेषामेघानां दर्शनमपि शुभसूचकमस्ति । मार्गशीर्षमासेऽतिशीतं तथा, पौषमासे तुषारपातश्चाशुभसूचकाः सन्ति ।

**माघफाल्गुनयोः लक्षणविवरणम् .** माघमासे प्रचण्डवायुः तुषारावृत्तौ सूर्यचन्द्रौ, एवमेव अतिशीतं वातावरणं गर्भधारणस्य कृते शुभदमस्ति । उदयास्तकाले मेघैरावृत्तसूर्यस्य दर्शनम् गर्भधारणाय शुभलक्षणम् अस्ति । फाल्गुनमासेऽपि माघमासवल्लक्षणानां दर्शनम् गर्भधारणाय शुभं भवति ।

**चैत्रवैशाखयोः लक्षणविवरणम् .** चैत्रमासे गर्भधारणसमये वर्षा मेघगर्भधारणस्य कृते शुभसूचिका भवति । वैशाखेऽपि चैत्रवल्लक्षणानां दर्शनं मेघगर्भधारणाय शुभं भवति ।
प्रतिमासं आचार्योक्तलक्षणाभ्यां विपरीतलक्षणानां दर्शनम् मेघगर्भधारणस्याफलत्वं सूचयति ।

***वर्षागर्भनाशविचारः***

प्रकृतिविपरीतलक्षणानां प्रवत्तिरुत्पातोऽस्ति । सत्यपि शुभलक्षणैर्युतो गर्भोऽप्युत्पातानां कारणेन कदाचित् गर्भविनाशस्य सम्भावना भवति । तथा च बहुविधानामुत्पातानां कारणेन गर्भोपघातस्य स्थितिर्जायते । वराहमतानुसारेणोत्पातानां लक्षणं यथा -

यः प्रकृतिविपर्यासः स संक्षेपतः उत्पातः
क्षितिगगनदिव्य जातो यथोत्तरं गुरुतरो भवति ॥ ( बृहत् संहिता, उत्पाताध्यायः, श्लो. १ )

क्षित्यन्तरिक्षभौमभेदेन उत्पातास्त्रयो भवन्ति । एते उत्पाता यथोत्तरं बलिनः सन्ति यथा, क्षित्युत्पाततः गगनोत्पातो बलवान् तथा च गगनोत्पाततः दिव्योत्पातः बलवान् भवति । अतस्तेषां सामान्यपरिचयस्तु यथास्ति ।

**दिव्योत्पाताः .** दिव्याकाशे ये उत्पाता भवन्ति ते दिव्योत्पाताः । भट्टतोत्पलमते तु दिव्याकाशे भवा दिव्योत्पाताः । नग्नचक्षुर्भि तेषामुत्पातानां दर्शनमतीव दुर्लभं भवति । प्रायः ग्रहनक्षत्रतारकेषु दिव्योत्पाताः भवन्ति । आचार्यवराहस्य मतानुसारेण–

दिव्यं ग्रहर्क्षवैकृतंमुल्कानिर्घात परिवेषाः। ( बृहत् संहिता, उत्पाताध्यायः, श्लो. ४ )

**अन्तरिक्षोत्पाताः .** अन्तरिक्षे वा आकाशे ये उत्पाता भवन्ति ते अन्तरिक्षोत्पाताः। भट्टतोत्पलमते तु अन्तरिक्षे भवा आन्तरिक्षोत्पाताः । उल्कापातः, वायुविकारः, सूर्यचन्द्रमसोः परिवेषः, गन्धर्वनगरदर्शनम्, इन्द्रायुधस्य दर्शनं, दिग्दाहः, परिघदण्डस्य दर्शनमन्तरिक्षोत्पाताः कथ्यन्ते। वराहस्य मतानुसारेण -

गन्र्धवपुरन्दरश्चापादि यदान्तिरक्षं तत्। ( बृहत् संहिता, उत्पाताध्यायः, श्लो. ४ )

**भौमोत्पाताः .** भूम्यां दृश्या भौमोत्पाता भवन्ति । भौमोत्पातास्तु चरस्थिरभेदेन द्विधा विभक्ताः सन्ति । भूम्यां चरवस्तुना चरोत्पाताः तथा च अचरवस्तुना अचरोत्पाता जायन्ते। यथा भूकम्पः, भूस्खलनम्, विस्फोटः स्थिरोत्पाताः सन्ति। वायुयानजलयानानां दुर्घटना चरोत्पाताः सन्ति। वराहस्तु भौमौत्पाताः अन्तरिक्षोत्पाताश्च शान्त्यादिकर्मणा शान्ताः भवन्तीति निर्दिशति किन्तु, दिव्योत्पातानां शान्तये उपायाभावत्वं कथयति। वराहस्य मतं यथा -

भौमं चरस्थिरभवं तच्छान्तिभिराहतं शुभमुपैति
नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके॥ ( बृहत् संहिता, उत्पाताध्यायः, श्लो. ५)

तथा च विषयेऽस्मिन् आचार्यगर्गमतं तु -

स्वर्भानुकेतुनक्षत्रग्रहतारार्कजेन्द्रजम्
दिवि चोत्पद्यते यच्च तद्दिव्यमिति कीर्तितम्
वाय्वभ्रसन्ध्यादिग्दाहपरिवेषतमांसि च
खपुरं चेन्द्रचापं च तद्विन्द्यादन्तरिक्षजम्
भूमावुत्पद्यते यच्च स्थावरं वाथ जङ्गमम्
तदेकदैशिकं भौममुत्पातं परिकीर्तितम्॥ ( बृहत् संहिता, उत्पाताध्यायः, श्लो. ४-५ )

गर्भधारणकाले दिव्यान्तरिक्षभौमोत्पाता गर्भविनाशं सूचयन्ति । यस्मिन् दिवसे गर्भविचारो क्रियते, तस्मिन् दिवसे यद्युत्पाता दृश्यन्ते तदा पञ्चनवते दिनशते व्यतीते तन्नक्षत्रस्थे चन्द्रे वर्षा न भवतीति ज्ञातव्यम्। आचार्यवराहमते उल्कापातः, अशनिपातः, पांशुपतः, दिग्दाहः, क्षितिकम्पः, गन्धर्वनगरदर्शनम्, कीलकदर्शनम्, ग्रहयुद्धम्, निर्घातः इत्येते उत्पाता गर्भनाशकारकाः भवन्ति। यदि गर्भधारणकाले एते उत्पाता दृश्यन्ते तदा दैवज्ञेन गर्भोपघातवारणाय शान्त्यादिकार्यं प्रवर्तनीयम् । यथोक्तं वराहेण -

गर्भोपघातलिङ्गान्युल्काशनिपातपांशुपातदिग्दाहाः
क्षितिकम्पखपुरकीलककेतुग्रहयुद्धनिर्घाताः
रुधिरादिवैकृतिपरिघेन्द्रधनूंषि दर्शनं राहोः

इत्युत्तपातैरेतै स्त्रिविधैश्चान्यैर्हतो गर्भः ॥ ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. २५-२६ )

आचार्यगर्गेण गर्भोपघातविषये यल्लिखितम् तद्यथा -

अश्मवर्षं तमोवर्षं मांसशोणितवर्षणम्
उल्कानिर्घातकम्पश्च वज्रपातस्तथैव च
परिवेषाः परिधयोः वासवस्य धनूंषि च
अनभ्रस्तनितं वर्षा दिशां दाहस्तथैव च
अनार्तवं पुष्पफलं वारणीयेषु वर्षणम्
ग्रहयुद्धेषु घोरेषु हतान् गर्भान् विनिर्दिशेत् ॥ ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. २५-२६ )

तथैव गर्भधारणकाले यदि अतिवृष्टिर्भवति तदा गर्भस्रावस्य सम्भावनोत्पद्यते । वराहमतानुसारेण अधिकवर्षायाः कारणेन जायमानस्य गर्भस्रावज्ञानविधिर्यथा -

गर्भसमयेऽतिवृष्टिगर्भाभावाय निर्निमित्तकृता
द्रोणष्टाशाऽभ्यधिके वृष्टे गर्भः स्रुतो भवति ॥ ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ३४ )

***वर्षाया: योगविचार:***

मेघगर्भस्य परीक्षणान्नतरं वर्षाया विचारो क्रियते । यतोहि प्रकृतिमण्डलमपि ग्रहानां मासानां नक्षत्राणां च स्थितीनां अनुसरणं करोति । अतएव गर्भधारणकाले शुक्लपक्षे धृतो गर्भः कृष्णपक्षे, एवमेव कृष्णपक्षे धृतगर्भः शुक्लपक्षे प्रवर्षति । अपरञ्च यदि दिवसे मेघगर्भं धारयति तदा रात्रौ वर्षा भवति, यदि रात्रौ गर्भं धारयति तदा दिवसे वर्षा भवति । एवमेव पूर्वसन्ध्यायां धृतो गर्भः परसन्ध्यायां तथा च परसन्ध्यायां धृतो गर्भः पूर्वसन्ध्यायां प्रसवति । अतएव वराहो यथाह -

सितपक्षभवाः कृष्णे शुक्ले द्युसम्भवा रात्रौ
नक्तंप्रभवाश्चाहनि सन्ध्याजाताश्च सन्ध्यायां ॥ ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ८ )

अस्मिन् विषये आचार्यगर्गेणापि मेघ गर्भात् वर्षायाः पक्षनिर्धारणं कृतम् । अमायां धृतो गर्भः पौर्णमास्यां तथा च पौर्णमास्यां धृतो गर्भोऽमायां प्रर्वषतीति प्रतिपादितम् । आचार्यगर्गस्य यन्मतं तद्यथा -

दिवा भवति यो गर्भो रात्रौ स इति पच्यते
शुक्लपक्षे समुद्भूतः कृष्णे पक्षे च वर्षति
पौर्णमास्यामथोत्पन्नः सोऽमवास्यां प्रवर्षति
अमावास्यां समुद्भूतः पौर्णमास्यां प्रवर्षति
पूर्वसन्ध्यासमुद्भूतः पश्चिमायां प्रवर्षति

पूर्वाह्ने य समुद्भूतः पश्चाद्रात्रौ प्रवर्षति
निशायां पश्चिमे यश्च स पूर्वाह्ने प्रसूयते
दिनार्धे तु समुत्पन्नः स निशार्द्धे प्रसूयते ॥ ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ८ )

आचार्यगर्गेण दिनार्धे धृतगर्भस्यापि प्रसवसमयनिर्धारणं कृतं न बहुविशेषः ।

मार्गशीर्षमासस्य शुक्लपक्षत आरभ्य चैत्रसितपक्षपर्यन्तं मेघगर्भधारणस्यावधिरस्ति । एते मासा यदि पूर्वोक्तोत्पातरहिता भवन्ति तदा अवश्यमेव गर्भधारणं भवति । मार्गशीर्षपौषशुक्लेषु धृता गर्भा मन्दफलदाः भवन्ति । वराहमतानुसारेण पौषशुक्ले धृतो गर्भः श्रावणशुक्लेऽभिवर्षति । तथा अनयैव रीत्या माघशुक्लस्य श्रावणकृष्णे, माघकृष्णस्य भाद्रशुक्ले तथा च फाल्गुनशुक्लस्य भाद्रकृष्णे, फल्गुनकृष्णस्य आश्विनशुक्ले चैत्रशुक्लस्य आश्विनकृष्णे, चैत्रकृष्णस्य आश्विनशुक्ले प्रवर्षति । आचार्यवराहमतानुसारेण मासे-मासे धृतस्य गर्भस्य प्रसवमासनिर्धारणम् लिख्यते -

मृगशीर्षाद्याः गर्भा मन्दफलाः पौषशुक्लजाताश्च
पौषस्य कृष्णपक्षेण निर्दिशेच्छवणस्य सितम्
माघसितोत्था गर्भाः श्रावणकृष्णपक्षे प्रसूतिमायान्ति
माघस्य कृष्णपक्षेण निर्दिशेत् भाद्रपदशुक्लम्
फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः
तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयक्शुक्ले
चैत्रसितपक्षजातो कृष्णः अश्वयुजश्च वारिदाः गर्भा
चैत्रसितसम्भूताः कार्तिकशुक्लेऽभिवर्षन्ति ॥ ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ९-१२ )

अस्मिन् सन्दर्भे आचार्यगर्गवचनं प्रस्तूयते -

माघेन श्रावणं विन्द्यान्नभस्यं फाल्गुनेन तु
चैत्रकृष्णाश्वयुजं प्राहुर्वैशाखेन तु कार्तिकम्
शुक्लपक्षेण कृष्णं तु कृष्णपक्षेण चेतरम्
रात्रान्ह्नोश्च विर्पयासं कार्यं काले विनिश्चयम् ॥ (बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ९-१२ )

आचार्यपराशरस्तु विषयेऽस्मिन् यथाह - "अथ माघेन श्रावणं फाल्गुनेन भाद्रपदं चैत्रेण आश्यवयुजं वैशाखेन तु कार्तिकम् शुक्लेन कृष्णं कृष्णेन शुक्लं दिवसेन रात्रिः रात्र्या दिवसं गर्भाः प्रवर्षन्ति" ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ९-१२ )। गर्गपराशरौ माघमासे धृतगर्भस्य श्रावणे, फाल्गुनस्य भाद्रपदे, चैत्रस्य अश्वयुजे तथा वैशाखस्य कार्तिके वर्षा भवतीति कथयतः । पराशरगर्गाणां वराहेण सह अत्र मतानां विपर्यास अस्ति इति प्रतिभाति । यथा आचार्यवराह मार्गशीर्षपौषशुक्लेषु धृतगर्भाः मन्दफलदाः भवन्तीति ब्रुबन् पौषकृष्णपक्षत आरभ्य चैत्रकृष्ण पर्यन्तमेव आगामीन्या वर्षाया मासान् कथयति । परन्तु पराशरगर्गौ तु वर्षायाः पक्षान् वर्णयत अर्थात् माघ-फाल्गुन-चैत्र-वैशाखेषु कृतगर्भविचारस्य भाद्रपदाश्विनकार्तिकमासपर्यन्तं

वर्षाया: प्रमाणं कथयतः। अत्र पराशरगर्गाणां वराहेण सह मतपार्थक्यम् विद्यते इति प्रतीयते। अत्र द्वयो: प्रतीयमान: य: मतभेद: मासपद्धतिविषयक: विद्यते । ज्यौतिषशास्त्रे मासगणनायाः पद्धतिर्बहुप्रकारका विद्यन्ते । पूर्णिमान्तगणनाविधिः, तथा च अमान्तगणनाविधिरिति द्वौ विधी प्रचलितौ स्त:। यदा मासः कृष्णपक्षस्य प्रतिपत्तिथित आरभ्यते पौर्णमास्यां समाप्यते तदा असौ पूर्णिमान्तचान्द्रमासः कथ्यते, अयमेव पूर्णिमान्तगणनाविधि इत्युच्यते। तथा च यदा शुक्लपक्षस्य प्रतिपत्ततिथित आरभ्य कृष्णपक्षस्य अमावास्यां मासः समाप्यते असौ अमान्तचान्द्रमासो भवति इति द्वितीयप्रकार: । अमान्तमासे प्रथमः शुक्लपक्षस्तथा ततः कृष्णपक्षः, पूर्णिमान्तमासे तु प्रथमः कृष्णपक्षः ततः परं शुक्लस्य प्रवृत्तिर्भवति । आचार्यवराहेण अमान्तमासो गृहीतः पराशरगर्गौ तु पूर्णिमान्तमासगणना विधि: स्वीकुरुत:। विषयेऽस्मिन् भट्टोत्पलमतमवलोकनीयम् –

> मृगशीर्षौ मृगशीर्षास्तदाद्याः प्रथमपक्षजाता गर्भा मन्दफलाः स्वल्पवर्षदा भवन्ति। प्रथमपक्षशुक्लपक्षस्तत्र जाताः सम्भूताः। अस्मिन् गर्भलक्षणे चैत्रसिताद्या मासाः विज्ञातव्याः। यथा चैत्रस्यशुक्लपक्षे वैशाखस्य कृष्णपक्ष इत्येष चैत्रमासः। एवमन्येषामपि मासानामपि परिकल्पना कार्या। एमवमेतच्चान्द्रमानम् ( बृहत् संहिता, गर्भलक्षणाध्याय:, श्लो. ९-१२ )।

### *शकुनवशात् वर्षाज्ञानम्*

शकुनो नाम प्राणीविशेषः। लोकव्यवहारे यात्राप्रसङ्गे जनाः शुभं शकुनं वाञ्छन्ति। शकुनविद्यायाः प्रयोगः न केवलं यात्रायां क्रियतेऽपि तु वर्षाज्ञानेऽपि क्रियते । प्राणीनां विभिन्नानां चेष्टानां शब्दानां वा सकाशात् वर्षाया अनुमानं क्रियते। आचार्यवराहेण बृहत् संहितायां श्वचेष्टाध्यायः, काकचेष्टाध्यायः इत्यत्र संक्षिप्तरूपेण वर्षानुमानविधिः कथितः।

**श्वशब्दवशात् वर्षाज्ञानम् .** वर्षर्तौ तृणादिभिर्निर्मितगृहाणां उच्चस्थानेषु गत्वा यदि श्वा बहुशब्दायते, तदा बहुवृष्टेः अनुमानं कर्तव्यम्। परन्तु यद्यन्येषु ऋतुषु शुनः एतादृश: शब्द: श्रूयते तदा अशुभं कल्पनीयम्। विषयेऽस्मिन् वराहस्य कथनं यथा -

> उच्चैस्वराः स्युस्तृणकूटसंस्था प्रासादवेश्मोत्तमसंथिता वा
> वर्षासु वृष्टिं कथन्ति तीव्रमन्यत्र मृत्युं दहनं रुजश्च ॥ ( बृहत् संहिता,श्वचक्राध्याय:, श्लो. ६)

वर्षाकाले यदि अनावृष्टिर्भवति तदा सारमेया जले स्नानं कृत्वा सिकतायां भूमौ वा भूयोभूयः क्रीडन्तः दृश्यन्ते , तथा च कम्पमाना: भूत्वा यदि सारमेया: जलपानं कुर्वन्ति, तदा द्वादशदिवसानन्तरं वर्षा भवति। वराहस्य कथनं विषयेऽस्मिन् यथा-

> प्रावृट्कालेऽवग्रहेऽम्भोवगाह्य प्रत्यावर्तै रेचकैश्चाप्यभीक्ष्णम्
> आधुन्वन्तो वा पिबन्तश्च तोयं वृष्टिं कुर्वन्त्यन्तरे द्वादशाहात् ॥ ( बृहत् संहिता,श्वचक्राध्याय:, श्लो. ७)

**काकचेष्टावशात् वर्षाज्ञानम् .** यदि काकः शरदृतौ वृक्षस्य पूर्वशाखायां नीडस्य निर्माणं करोति, तदा वर्षर्तौ पश्चिमायां दिशि प्रथमा वृष्टिर्भविष्यति। अनेनैव प्रकारेण यदि काक: दक्षिणशाखायां उत्तरशाखायां वा नीडनिर्माणं करोति, तदा

तस्य वृक्षस्य प्रदेशे प्रधानवृष्टिर्भवति । यदि काक: आग्नेयशाखायां नीडनिर्माणं करोति तदा खण्डवृष्टिः, नैऋत्यां धान्यानां वृद्धिर्भवति तथा च वायव्यैशान्यां सुभिक्षं भवति । वराहस्य कथनमत्र यथास्ति -

नीडेप्राक्शाखायां शरदि भवेत् प्रथमवृष्टिरपरस्याम्
याम्योत्तरयोर्मध्यात् प्रधानवृष्टिस्तरोरुपरि
शिखिदिशि मण्डलवृष्टिर्नैऋत्यां शारदस्य निष्पत्तिः
परिशेषयोः सुभिक्षं मूषकसम्पच्च वायव्ये ॥ ( बृहत् संहिता,वायसविरुताध्यायः, श्लो. ७)

एवञ्च अर्जुनवृक्षे वञ्जुलवृक्षे वा स्थिता काकाः शब्दं कुर्वन्तः श्रूयन्ते तदा वर्षा भवति इति वराहमतम् । वराहस्य कथनानुसारेण -

सक्षीरार्जुनवञ्जुलकूलद्वयपुलिनगा रुवन्तश्च
प्रावृषि वृष्टिं दुर्दिनमनृतौ स्नाताश्च पांशुजलैः ॥ ( बृहत् संहिता,वायसविरुताध्यायः, श्लो. १६)

**निष्कर्षः**

मेघस्य गर्भधारणकालस्य वर्षाकालस्य च ज्ञानं ग्रह-नक्षत्र-मासानां योगवशात् भवति तस्मात् इयं प्रकृति ग्रहाणां नक्षत्राणां गतीनामनुसरणं विधत्ते । अत: तेषां पूर्वोक्तानां स्थितीनामनुसन्धानेन वर्षाविषयकज्ञानं कर्तुं शक्यते । वर्षाविज्ञानं न केवलं सैद्धान्तिको विषय: विद्यते अपि तु प्रयोगात्मकं कृषे: आधारभूतं विज्ञानमस्ति । एतद्विज्ञानं न केवलं कृषिकर्मणां अपि तु शिल्पवाणिज्यप्रभृतीनां कर्मणां कृते अपि आवश्यकमस्ति । यानप्रशासनादिकार्येषु वर्षाविज्ञानस्य ज्ञानमपरिहार्यमस्ति । कृषिकर्मण एवमेव वाणिज्यस्य कृते महदुपकारित्वाद् विज्ञानमेतत् कृषिविज्ञानस्यापरिहार्यमङ्गमिति विद्यते । वर्षाविज्ञानज्ञानविरहितो कृषकः तत्कर्मणि सफलो भवतीत्यत्र सन्देहः । न च, वर्षाविज्ञानस्य ज्ञानं विनापि सरित्कूपकुल्यादीनां सहयोगेन कृषिकार्यं सफलं भवतीति वक्तव्यम् । यतो हि सरित्कुल्यादयोऽपि वर्षाधीना । कृषि न केवलं अवर्षणाद्विनश्यति अपि तु अनवसरे वर्षणादपि नश्यति । अवर्षणात्, उप्तबीजानां अनफलत्वात्, कर्षणवपनादिकार्येषु कृतभूरिपरिश्रमो वृथा भवति । तस्माद् वर्षाविज्ञानस्य ज्ञानेन जनः कृषिकर्मणि तथाचान्येषु कर्मस्वपि अवश्यमेव सफलो भविष्यति । अस्य वर्षाविज्ञानस्य ज्ञानयुतोनरः वैज्ञानिको भूत्वा सकलराष्ट्रस्य विकासार्थं निधिः भवितुं शक्नोतीति न संशयः ।

**सन्दर्भसूची**

*ऐतरेय ब्राह्मणम्* (सरलाहिन्दी व्याख्ययोपेता) (ई. १९८०). तारा प्रिन्टिङ वर्क्स । https://archive.org/details/in.ernet.dli.2015.407784/page/n1/mode/2up

*छान्दोग्योपनिषत्* (सानुवाद शांकरभाष्यसहित)(ष. सं.) (२०२८). मोतीलाल जालान, गीताप्रेस । https://archive.org/details/WSvX_chandogya-upanishad-with-shankar-bhasya-dial.-2028-geeta-press/page/n5/mode/2up

*तैतरेय ब्राह्मणम्* (भट्टभास्करमिश्रविरचित भाष्यसहिता) (ई. १९८५). मोतीलाल बनारसीदास । https://archive.org/details/in.ernet.dli.2015.345406/page/n3/mode/2up

त्रिपाठी, धुनीराम, (ई. २००२). *प्राच्यभारतीयं ऋतुविज्ञानम्*. सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

दाहाल, लोकमणि: (२०४७). *ज्योतिषशास्त्रस्येतिहासः*. चौखम्बा सुरभारती प्रकाशन।

दुबे, उमाशंकरः (ई. १९८९). *प्राचीन वर्षा विज्ञान*. हनुमत् ज्योतिष मन्दिर।

*ब्रह्मवैवर्तमहापुराणम्* (श्रीकृष्णजन्मखण्डात्मकम्) (२०१२). गोपाल प्रिन्टिङ वर्क्स । https://archive.org/details/lNXP_brahma-vaivarta-puranam-shri-krishna-janm-khand-of-veda-vyas-vol-2-1955-guru-man/page/n3/mode/2up.

*मनुस्मृतिः (मेधातिथिभाष्य समलङ्कृता) (२०२४).* भगवानदत्त शास्त्री, उदयाचल प्रेस । https://archive.org/details/manusmriti-with-medhatithi-bhashya-gurumandal-series/Manusmriti%20with%20Medhatithi%20Bhashya%20Part%201%20-%20Mansukhray%20More%201967%20%28Gurumandal%29/page/n1/mode/2up

नारदसंहिता (विमला हिन्दीटिकासहिता) (द्वि. सं.) (२०४०). चौखम्बा संस्कृत संस्थान । https://archive.org/details/RKpL_narad-samhita-of-narada-with-vimal-hindi-tika-by-acharya-ram-janma-mishra-kashi-/page/n1/mode/2up

वराहमिहिरः (ई. २००२). *बृहत्संहिता* (प्रथमो भागः) *(भट्टोत्पलविवृतिसहिता)*. सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

वराहमिहिरः (ई. २००५). *बृहत्संहिता* (द्वितीयो भागः) (*भट्टोत्पलविवृतिसहिता)*. सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।